सञ्चलनं, क्ली, कम्पनम् । संपूर्व्वचलधातोरनट्(ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा,मार्कण्डेये । ८ । १९ ।

"केचिद्गिरिनिपातेन केचिदम्भोधिवारिणा ।
केचित् महीसञ्चलनात् प्रययुः प्राणिनः क्षयम् ॥"

सञ्चानः, पुं, श्येनपक्षी । इति केचित् ॥ शिक्रे इति भाषा ॥

सञ्चाय्यः, पुं, (संचीयतेऽस्मिन् सोम इति । सं + चि + "क्रतौ कुण्डपाय्यसञ्चाय्यौ ।" ३।१।१३०। इति ण्यदायादेशौ निपात्येते ।) यज्ञविशेषः । इति मुग्धबोधव्याकरणम् ॥

सञ्चारः, पुं, ( सं + चर + घञ् । ) दुर्गसञ्चरः । इत्यमरटीका ॥ गमनम् । यथा । सञ्चारो रतिमन्दिरावधि इत्यादि काव्यप्रकाशः ॥ ( यथा, रघुः । २ । १५ ।

"सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुं ।
प्रचक्रमे पल्लवरागताम्रा
प्रभा पतङ्गस्य मुनेश्च धेनुः ॥")

ग्रहादे राश्यन्तरसंक्रमनञ्च ॥ ( यथा, याज्ञवल्क्ये । ३ । १७२ ।

"तारा नक्षत्रसञ्चारैर्ज्जागरैः स्वप्नजैरपि ॥"*॥

सञ्चरत्यस्मिन्निति । अधिकरणे घञ् । देशः । इति रामायणटीका ॥ यथा, रामायणे । २ । ११९ । १८ ।

"तावूचुस्ते वनचरास्ता ।सा धर्म्मचारिणः ।
वनस्य तस्य संचारं राक्षसैः समभिप्लुतम् ॥")

सञ्चारजीवी, [ न् ] त्रि, ( सञ्चारेण जीवतीति । जीव + णिनिः । ) शरणापन्नः । इति त्रिकाण्डशेषः ॥

सञ्चारिका, स्त्री, (सञ्चारयति नायकयोर्व्वार्त्तामिती । सं + चर + णिच् + ण्वुल् । ) दूती । इत्यमरः ॥ युगलम् । कुट्टनी । घ्राणम् । इति मेदिनी ॥

सञ्चारी, [न्] पुं, ( सञ्चरतीति । सं + चर + णिनिः ।) धूपः । इति त्रिकाण्डशेषः ॥ वायुः ॥ इति शब्दचन्द्रिका ॥ भावविशेषः । यथा,—

"स्थायिसात्त्विकसञ्चारिप्रभेदैः स्याद्रतिः पुनः ।"
इति हेमचन्द्रः ॥

अन्यच्च ।

"सञ्चारिणः प्रधानानि देवादिविषया रतिः ।
उद्बुद्धमात्रस्थायी च भाव इत्यभिधियते ॥"

अपि च ।

"नानाभिनयसम्बन्धान् भावयन्ति रसान् यतः ।
तस्माद्भावा अमी प्रोक्ताः स्थायिसञ्चारि-
सात्त्विकाः ॥"

वात्सल्यरससञ्चारिणो यथा,—

"सञ्चारिणोऽनिष्टशङ्काहर्षगर्व्वादयो मताः ॥"

वीररससञ्चारिणस्तु । "धृतिमतिगर्व्वस्मृतितर्करोमाञ्चाः ।" इति साहित्यदर्पणे ३ परिच्छेदः ॥ (गतिशीले, त्रि । यथा, गीतगोविन्दे । ६ । ११ ।

"अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि
सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं
ध्यायति ॥")

सञ्चारिणी, स्त्री, ( सञ्चरतीति । सं + चर + णिनिः । ङीप् । ) हंसपदी । इति राजनिर्घण्टः ॥ (गतिशीला । यथा, कुमारे ।३।५४।

"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव ॥")

सञ्चाली, स्त्री, गुञ्जा । यथा,—

"सञ्चाली प्रोच्यते गुञ्जा सा तिस्रो रूपकं
भवेत् ॥"
इति युक्तिकल्पतरुः ॥

सञ्चित्रा, स्त्री, (सम्यक् चित्रमस्यामिति ।) मूषीकर्णी । इति शब्दरत्नावली ॥

सञ्चेयं, त्रि, सञ्चयनीयम् । सञ्चेतव्यम् । संपूर्व्वकचिञ्धातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥

सञ्जः, पुं,(सम्यक् जायते इति । सं + जन + डः । सम्यक् जयतीति । जि + अन्येष्वपीति वा डः ।) ब्रह्मा । शिवः । इति मेदिनी ॥

सञ्जवनं, क्ली, (सञ्जवन्ति संमिलन्त्यत्रेति । सं + जु गतौ + अधिकरणे ल्युट् ।) अन्योन्याभिमुखगृहचतुष्टयम् । तत्पर्य्यायः । चतुःशालम् २ । इत्यमरः ॥ संयसनम् ३ चतुःशाली ४ । इति भरतः ॥ सञ्जीवनम् ५ शाला ६ निलयः ७ चतुःशालकम् ८ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १५५ । ५६ ।

"तस्मिन् सुविहिताः सर्व्वे रुक्मदण्डाः पताकिनः
सदने वासुदेवस्य मार्गसञ्जवनध्वजाः ॥")

सञ्जा, स्त्री, छागी । इति त्रिकाण्डशेषः ॥

सञ्जीवनं, क्ली, (सञ्जीव्यतेऽस्मिन्निति । सं + जीव + अधिकरणे ल्युट् । ) सञ्जवनम् । इति शब्दरत्नावली ॥ ( सं + जीव + भावे ल्युट् । ) सम्यक्प्रकारेण प्राणधारणञ्च ॥ (यथा, मुकुन्दमालायाम् । ३० ।

"व्यामोहोद्दलनौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्यानर्थकरौषधं त्रिजगतां सञ्जीवनैकौषधम् ।
भक्तार्त्तिप्रशमौषधं भवभयप्रध्वंसि दिव्यौषधं
श्रेयः प्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौ-
षधम् ॥"

नरकविशेषः । यथा, मनुः । ४ । ८९ ।

"नरकं कालसूत्रञ्च महानरकमेव च ।
सञ्जीवनं महावीचिं तपनं सम्प्रतापनम् ॥"

स्त्री, विद्याविशेषः । यथा महाभारते । १ । ७६ । ३३ ।

"ततः सञ्जीवनीं विद्यां प्रयुज्य कचमाह्वयत् ॥")

सञ्ज्ञं, क्ली, संज्ञम् । इति शब्दचन्द्रिका ॥

सञ्ज्ञः, त्रि, संज्ञः । इत्यमरटीकायां भरतः ॥

सञ्ज्ञपनं, क्ली, ( सं + ज्ञा + णिच् + ल्युट् । ) संज्ञपनम् । इत्यमरः ॥

सञ्ज्ञप्तिः, स्त्री, ( सं + ज्ञा + णिच् + क्तिन् । ) संज्ञप्तिः । इति हेमचन्द्रः ॥

सञ्ज्ञा, स्त्री, (सं + ज्ञा + अङ् ।) संज्ञा । इति मेदिनी ॥

सञ्ज्ञुः, त्रि, (संहते जानुनी यस्य । "प्रसंभ्यां जानुनोर्ज्ञुः ।" ५ । ४ । १२९ । इति ज्ञुः ।) संज्ञुः । इत्यमरः ॥

सञ्ज्वरः, पुं, (सम्यक् ज्वरः ।) संज्वरः । इत्यमरः ॥

सटं, क्ली, ( सटतीति । सट अवयवे + अच् । ) जटा । यथा,—

"जटा जटिर्जटी झूटी जुटकन्तु सटं सटा ।
कोटीरं जूटकं हस्तं शिखायां व्रतिनामपि ॥"
इति शब्दरत्नावली ॥

सटा, स्त्री, ( सट अवयवे + अच् । ) जटा । केशरः । इति मेदिनी ॥ ( यथा, रघुः । ९ । ६० ।

"तं वाहनादवनतोत्तरकायमीषत्
विध्यन्तमुद्धतसटाः प्रतिहन्तुमीषुः ॥")

शिखा । इति शब्दरत्नावली ॥ ( यथा, भागवते । ४ । ५ । २ ।

"क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटि-
र्जटां तडिद्वह्निसटोग्ररोचिषम् ।")

सटाङ्कः, पुं, (सटा अङ्कश्चिह्नं यस्य । ) सिंहः । इति शब्दरत्नावली ॥

सटिः, स्त्री, (सटतीति । सट अवयवे + इन् । ) शटी । इति शब्दरत्नावली ॥

सटिका, स्त्री, गन्धपत्रा । सटी । इति राजनिर्घण्टः ॥

सटी, स्त्री, (सटि + वा ङीष् ।) गन्धद्रव्यविशेषः ॥ वन आदा इति आम्लहरिद्रा इति च भाषा । आंबेहलदी इति कोङ्कणे प्रसिद्धा । तत्पर्य्यायः । शटी २ गन्धशटी ३ सुगन्धा ४ सटिः ५ शटिः ६ गन्धमूला ७ गन्धमूली ८ पलाशः ९ कर्व्वुरः १० षड्ग्रन्थिका ११ कर्व्वूरः १२ गन्धोलिः १३ गन्धमूलकः १४ । इति शब्दरत्नावली ॥ शठी १५ षड्ग्रन्था १६ आम्लनिशा १७ वधूः १८ गन्धारी १९ सटिका २० पलाशिका २१ समुद्रा २२ तृणी २३ दूर्व्वा २४ गन्धा २५ पृथुपलाशिका २६ सौम्या २७ हिमोद्भवा २८ गन्धवधूः २९ । अस्या गुणाः । सुतिक्तत्वम् । अम्लरसत्वम् । लघुत्वम् । उष्णत्वम् । रुचिप्रदत्वम् । ज्वरकफासकण्डूव्रणदोषवक्त्रामयनाशित्वम् । हृद्यत्वञ्च । इति राजनिर्घण्टः ॥

सट्टा, स्त्री, पक्षिभेदः । वाद्यम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

सठ, क स्वठार्थे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् । ) दन्त्यादिः । क, साठयति सठार्थे गत्यसंस्कृतसंस्कृतेषु । इति दुर्गादासः ॥

सठी, स्त्री, शठी । इति राजनिर्घण्टः ॥

सणसूत्रं, क्ली, ( सणस्य सूत्रम् । ) शणसूत्रम् । इत्यमरटीकायां रायमुकुटः ॥

सण्डः, पुं, षण्डः । इत्यमरटीका ॥